

RADHA & KRISHNA SANSKRIT BHAJAN, SHLOK, STOTRA

PROOF READ AND CREATED BY DIPTI DHAKUL

कृष्णजन्मस्तुतिः

रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥ १॥
नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ।
व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः ॥ २॥
योऽयं कालस्तस्य तेऽव्यक्तबन्धोश्चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरान्तो महीयांस्तं त्वीशानं क्षेमधाम प्रपद्ये ॥ ३॥
मर्त्यो मृत्युव्यालभीतः पलायन्सर्वाँल्लोकान्निर्वृतिं नाध्यगच्छत् ।
त्वत्पादाब्जं पाप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥ ४॥

इति श्रीमद्भागवते दशमस्कन्धे तृतीयाध्यायान्तर्गता

देवकीकृता स्तुतिः समाप्ता ।



श्रीराधाप्रार्थना उद्धवकृता

उद्धव उवाच ।

चेतनं कुरु कल्याणि जगन्मातर्नमोऽस्तुते ।
त्वमेव प्राक्तनं सर्वं कृष्णं द्रक्ष्यसि साम्प्रतम् ॥ १॥
त्वत्तो विश्वं पवित्रं च त्वत्पादरजसा मही ।
सुपवित्रं त्वद्वदनं पुण्यवत्यश्च गोपिकाः ॥ २॥
लोकास्त्वामेव गायन्ति गीतैर्मङ्गलसंस्तवैः ।
त्वत्सुकीर्तिं च वेदाश्च सनकाद्याश्च संततम् ॥ ३॥
कृतपापहरां पुण्यां तीर्थपुजां च निर्मलाम् ।
हरिभक्तिप्रदां भद्रां सर्वविघ्नविनाशिनीम् ॥ ४॥
त्वमेव राधा त्वं कृष्णस्त्वं पुमान् प्रकृतिः परा ।
राधामाधवयोर्भेदो न पुराणे श्रुतौ तथा ॥ ५ ॥

॥ इति श्रीब्रह्मवैवर्ते पुराणे श्रीकृष्णजन्मखण्डे
उद्धवकृता श्रीराधा प्रार्थना सम्पूर्णा ॥

कृष्णचैतन्यद्वादशनामस्तोत्रम्

चैतन्यः कृष्णचैतन्यो गौराङ्गो द्विजनायकः ।
यतीनां दण्डिनां चैव न्यासिनां च शिरोमणिः ॥ १॥
रक्ताम्बरधरः श्रीमान् नवद्वीपसुधाकरः ।
प्रेमभक्तिप्रदश्चैव श्रीशचीनन्दनस्तथा ॥ २॥
द्वादशैतानि नामानि त्रीसन्ध्यं यः पठेन्नरः ।
तस्य वाञ्छासुसिद्धिः स्याद्भक्तिः श्रीलपदाम्बुजे ॥ ३॥

इति सार्वभौम भट्टाचार्यविरचितं

कृष्णचैतन्यद्वादशनामस्तोत्रं सम्पूर्णम् ।

श्रीराधाकृष्णस्तुतिः

नवललितवयस्कौ नव्यलावण्यपुञ्जौ
नवरसचलचित्तौ नूतनप्रेमवृत्तौ ।
नवनिधुवनलीलाकौतुकेनातिलोलौ
स्मरनिभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥
द्रुतसुकनकसुगौरस्निग्धमेघौघनील-
च्छविभिरखिलवृन्दारण्यमुद्भासयन्तौ ।
मृदुलनवदुकूले नीलपीते दधानौ
स्मर निभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥
इति श्रीराधाकृष्णस्तुतिः समाप्ता ।

कृष्णचैतन्यद्वादशनामस्तोत्रम्

चैतन्यः कृष्णचैतन्यो गौराङ्गो द्विजनायकः ।
यतीनां दण्डिनां चैव न्यासिनां च शिरोमणिः ॥ १॥
रक्ताम्बरधरः श्रीमान् नवद्वीपसुधाकरः ।
प्रेमभक्तिप्रदश्चैव श्रीशचीनन्दनस्तथा ॥ २॥
द्वादशैतानि नामानि त्रीसन्ध्यं यः पठेन्नरः ।
तस्य वाञ्छासुसिद्धिः स्याद्भक्तिः श्रीलपदाम्बुजे ॥ ३॥

इति सार्वभौम भट्टाचार्यविरचितं

कृष्णचैतन्यद्वादशनामस्तोत्रं सम्पूर्णम् ।



श्रीराधाकृष्णस्तुतिः

नवललितवयस्कौ नव्यलावण्यपुञ्जौ
नवरसचलचित्तौ नूतनप्रेमवृत्तौ ।
नवनिधुवनलीलाकौतुकेनातिलोलौ
स्मरनिभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥
द्रुतसुकनकसुगौरस्निग्धमेघौघनील-
च्छविभिरखिलवृन्दारण्यमुद्भासयन्तौ ।
मृदुलनवदुकूले नीलपीते दधानौ
स्मर निभृतनिकुञ्जे
राधिकाकृष्णचन्द्रौ ॥

इति श्रीराधाकृष्णस्तुतिः समाप्ता ।

श्रीकृष्णवन्दना

वंशीवादन तत्परञ्च शुभदं कान्त्या लसद्विग्रहम् ।
केकी कण्ठमयं च श्यामलतनुं गोवंशसङ्घावृतम् ॥ १॥
भालस्यो परि शोभितं सुमुकुटं वर्हाङ्गपर्णाङ्कितम् ।
माणिक्यादिगणैर्सुसज्जितवपुं प्रकाश आभायुतम् ॥ २॥
कण्ठे सुन्दरदाम कौस्तुभमणिं हस्तेशुभं कङ्कणम् ।
अङ्गुल्यामपि मुद्रिका मणियुता वंशी करे शोभिता ॥ ३॥
बिम्बाभे सुमुखे प्रयुज्यरणयन् आनन्द दानेरतम् ।
शोभाधामनमामि कृष्णमनिशं शान्तिप्रदं तं हरिम् ॥ ४॥
इति स्वामि उमेश्वरानन्दतिर्थविरचितं श्रीकृष्णवन्दना समाप्ता ।

श्रीराधादामोदरध्यानम्

विश्वब्रह्माण्डकान्तौ सुरमुनिविनुतौ पापतापादिनिघ्नौ
ब्रह्मानन्दस्वरूपौ निखिलजनपती सर्वजीवस्य बन्धू ।
मोक्षस्थानाधिनाथौ शमनभयहरौ गोपगोपीप्रपूज्यौ
राधादामोदरौ तौ भजकसुखकरौ रक्षतां नौमि नित्यम् ॥ १॥
वृन्दारण्यस्य सारौ नटगुणभरितौ गोपदेशस्य चन्द्रौ
कालिन्दीतोयलीलौ नवरसरसितौ रासलीलाप्रवीणौ ।
नानाक्रीडातिदक्षौ निधुवनरसिकौ कुञ्जपुञ्जश्रितौ यौ
राधादामोदरौ तौ भजकसुखकरौ
रक्षतां नौमि नित्यम् ॥ २॥

इति श्रीव्रजकिशोरविरचितं
श्रीराधादामोदरध्यानं सम्पूर्णम् ।

श्री अष्टाक्षरीध्यानम्

वेदान्तस्वद्रुमायस्तलपरिलसिताष्टाक्षराष्टच्छदाब्जे
तिष्ठन् वामाङ्घ्रिणासावितरपदतलं वामतोऽग्रे निधाय ।
बिभ्रत् सर्वा विभूतीर्मणिगणविलसद्भूषणश्यामलश्रीः
शब्दब्रह्मात्मवेणुं भुवनधृतिहरं नादयन् माधवोऽव्यात् ॥ १॥

इति श्री अष्टाक्षरीध्यानं सम्पूर्णम् ।



श्रीराधादामोदरध्यानम्

विश्वब्रह्माण्डकान्तौ सुरमुनिविनुतौ पापतापादिनिघ्नौ
ब्रह्मानन्दस्वरूपौ निखिलजनपती सर्वजीवस्य बन्धू ।
मोक्षस्थानाधिनाथौ शमनभयहरौ गोपगोपीप्रपूज्यौ
राधादामोदरौ तौ भजकसुखकरौ रक्षतां नौमि नित्यम् ॥ १॥
वृन्दारण्यस्य सारौ नटगुणभरितौ गोपदेशस्य चन्द्रौ
कालिन्दीतोयलीलौ नवरससरसितौ रासलीलाप्रवीणौ ।
नानाक्रीडातिदक्षौ निधुवनरसिकौ कुञ्जपुञ्जश्रितौ यौ
राधादामोदरौ तौ भजकसुखकरौ रक्षतां नौमि नित्यम् ॥ २॥
इति श्रीव्रजकिशोरविरचितं श्रीराधादामोदरध्यानं सम्पूर्णम् ।

एकश्लोकी भागवतम्

आदौ देवकिदेविगर्भजननं गोपीगृहे वर्धनम्
मायापूतनजीवितापहरणं गोवर्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुंतीसुतां पालनम्
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ।

इति श्रीभागवतसूत्र ॥

एकाक्षरकृष्णमन्त्रम्

ॐ पूर्णज्ञानात्मने हृदयाय नमः ।

ॐ पूर्णैश्वर्यात्मने शिरसे स्वाहा ।

ॐ पूर्णपरमात्मने शिखायै वषट् ।

ॐ पूर्णानन्दात्मने कवचाय हुं ।

ॐ पूर्णतेजात्मने नेत्राभ्यां वौषट् ।

ॐ पूर्णशक्त्यात्मने अस्त्राय फट् ।

इति दिग्बन्धः ॥

एकाक्षर श्रीकृष्णमहामन्त्रस्य -

ब्रह्मा ऋषिः - निचृत् गायत्री छन्दः - श्रीकृष्णो देवता -

श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥

ध्यानम्

ध्यायेद्धरिं मणिनिभं जगदेकवन्द्यं

सौन्दर्यसारमरिशङ्खवराभयानि ।

दोर्भिर्दधानमजितं सरसं सभैष्मी-

सत्यासमेतमखिलप्रदमिन्दिरेशम् ॥

मूलमन्त्रं ॐ - क्लीं - ॐ

इति एकाक्षरकृष्णमन्त्रं सम्पूर्णम् ।

श्रीकृष्णशरणाष्टकम्

सर्वसाधनहीनस्य पराधीनस्य सर्वतः ।
पापपीनस्य दीनस्य श्रीकृष्णः शरणं मम ॥ १॥
संसारसुखसम्प्राप्तिसन्मुखस्य विशेषतः ।
वहिर्मुखस्य सततं श्रीकृष्णः शरणं मम ॥ २॥
सदा विषयकामस्य देहारामस्य सर्वथा ।
दुष्टस्वभाववामस्य श्रीकृष्णः शरणं मम ॥ ३॥
संसारसर्वदुष्टस्य धर्मभ्रष्टस्य दुर्मतेः ।
लौकिकप्राप्तिकामस्य श्रीकृष्णः शरणं मम ॥ ४॥
विस्मृतस्वीयधर्मस्य कर्ममोहितचेतसः ।
स्वरूपज्ञानशून्यस्य श्रीकृष्णः शरणं मम ॥ ५॥
संसारसिन्धुमग्नस्य भग्नभावस्य दुष्कृतेः ।
दुर्भावलग्नमनसः श्रीकृष्णः शरणं मम ॥ ६॥
विवेकधैर्यभक्त्यादिरहितस्य निरन्तरम् ।
विरुद्धकरणासक्तेः श्रीकृष्णः शरणं मम ॥ ७॥
विषयाक्रान्तदेहस्य वैमुख्यहृतसन्मतेः ।
इन्द्रियाश्वगृहितस्य श्रीकृष्णः शरणं मम ॥ ८॥
एतदष्टकपाठेन ह्येतदुक्तार्थभावनात् ।
निजाचार्यपदाम्भोजसेवको दैन्यमाप्नुयात् ॥ ९॥

॥ इति हरिदासवर्यविरचितं श्रीकृष्णशरणाष्टकं सम्पूर्णम् ॥



श्रीराधाकृष्णस्तोत्रम्

॥ अथ ब्रह्मादिकृतं श्रीराधाकृष्णस्तोत्रम् ॥

ब्रह्मोवाच ।

तव चरणसरोजे मन्मनश्चरीको
भ्रमतु सततमीश प्रेमभक्त्या सरोजे ।
भवनमरणरोगात् पाहि शान्त्यौषधेन
सुदृढसुपरिपक्वाम् देहि भक्तिं च दास्यम् ॥ १॥

शंकर उवाच ।

भवजलनिधिमग्नश्चित्तमीनो मदीयो
भ्रमति सततमस्मिन् घोर्संसार्कूपे ।
विषयमतिविनिन्द्यं सृष्टिसंहाररूपम्-
अपनय तव भक्तिं देहि पादारविन्दे ॥ २॥

धर्म उवाच ।

तव निजजनसार्धं संगमो मे सदैव
भवतु विषयबन्धच्छेदने तिक्ष्णखड्गः ।
तव चरणसरोजस्थानदानैकहेतुर्-
जनुषि जनुषि भक्तिं देहि पादारविन्दे ॥ ३॥

॥ इति श्रीब्रह्मवैवर्ते ब्रह्मादिकृतम्
श्रीराधकृष्णस्तोत्रं सम्पूर्णम्॥

श्रीकृष्णशरणाष्टकम्

द्विदलीकृतदृक्स्वास्यः पन्नगीकृतपन्नगः ।
कृशीकृतकृशानुश्च श्रीकृष्णः शरणं मम ॥ १॥
फलीकृतफलार्थी च कुस्सितीकृतकौरवः ।
निर्वातीकृतवातारिः श्रीकृष्णः शरणं मम ॥ २॥
कृतार्थीकृतकुन्तीजः प्रपूतीकृतपूतनः ।
कलङ्कीकृतकंसादिः श्रीकृष्णः शरणं मम ॥ ३॥
सुखीकृतसुदामा च शङ्करीकृतशङ्करः ।
सितीकृतसरिन्नाथः श्रीकृष्णः शरणं मम ॥ ४॥
छलीकृतबलिद्यौर्यो निधनीकृतधेनुकः ।
कन्दर्पीकृतकुब्जादिः श्रीकृष्ण शरणं मम ॥ ५॥
महेन्द्रीकृतमाहेयः शिथिलीकृतमैथिलः ।
आनन्दीकृतनन्दाद्यः श्रीकृष्णः शरणं मम ॥ ६॥
वराकीकृतराकेशो विपक्षीकृतराक्षसः ।
सन्तोषीकृतसद्भक्तः श्रीकृष्णः शरणं मम ॥ ७॥
जरीकृतजरासन्धः कमलीकृतकार्मुकः ।
प्रभ्रष्टीकृतभीष्मादिः श्रीकृष्णः शरणं मम ॥ ८॥
श्रीकृष्णः शरणं ममाष्टकमिदं प्रोत्थाय यः सम्पठेत्
स श्रीगोकुलनायकस्य पदवी संयाति भूमीतले ।
पश्यत्येव निरन्तरं तरणिजातीरस्थकेली प्रभोः
सम्प्राप्नोति तदीयतां प्रतिदिनं गोपीशतैरावृताम् ॥ ९॥
॥ इति श्रीदेवकीनन्दनात्मज श्रीरघुनाथप्रभुकृतं
श्रीकृष्णशरणाष्टकं सम्पूर्णम् ॥

श्रीकृष्णषट्कम्

(श्रीकालटिक्षेत्रे)

भगवत्पदकरपङ्कजपूजितपदपद्म शङ्खचक्रधर ।
यदुनन्दन नतनन्दन पाहि सदा मां कृपापयोराशे ॥ १॥

नवनीतादप्यधिकं मृदु मम हृदयं प्रणम्ररक्षायाम् ।
इति बोधयितुं धत्से नवनीतं किं करे कृष्ण ॥ २॥

गोगोपमुक्तिदं त्वां गोभारहरं कृपापयोराशिम् ।
गोपीजनार्चितपदं गोप्राप्त्यै नौमि देवकीसूनुम् ॥ ३॥

गोवर्धनमन्दरधरधरणाद्गर्वायसे वृथा शौरे ।
यद्यस्ति शक्तिरधुना धर मां धरणीरमार्चिताङ्घ्रियुग ॥ ४॥

अल्पबलकैटभादीन् हत्वा गर्वं वृथा कुरुषे ।
मोहाभिधानमसुरं जहि शीघ्रं शक्तिरस्ति यदि कृष्ण ॥ ५॥

शङ्करगुरुवरकरवरकमलार्चिताङ्घ्रियुग कृष्णा ।
किङ्करवरजनवृन्दं तोषय तोयालिशयनकमलेश ॥ ६॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितं श्रीकृष्णषट्कं सम्पूर्णम् ।

श्रीकृष्णस्तोत्रं

``श्रीकृष्णः शरणं मम'' ।

त्रिभङ्गललितः कृष्णः परमेश परात्परः ।
मयूरपिच्छमुकुटगुडा केशाच्युतव्ययः ॥ १॥
मणिमाणिक्यमाल्यादि हारभूषणभूषितः ।
पीताम्बरोनटवरः घनश्यामलविग्रहः ॥ २॥
श्रीधरः सच्चिदानन्दः सर्वानन्द फलप्रदः ।
जगत्पति जगत्कर्ता जगल्लयसतत्परः ॥ ३॥
सुपूर्ण परमानन्दः नन्दनन्दन बालकः ।
लीला नरवपुहरिः लीलाकैवल्यविग्रहः ॥ ४॥
धरणीधरः सर्वज्ञः ईश्वरः परमेश्वरः ।
भूभार हारक सर्वः सिन्धु मध्ये निवासकः ॥ ५॥
अनन्तगोपकन्यानां रासलीला कर प्रभुः ।
अन्तर्यामि सर्वविच्च कैवल्य मुक्ति दायकः ॥ ६॥
आदि मध्यावसानेषु नित्य शुद्धः सनातनः ।
श्रीकृष्णमखिलाधारं भक्तवाञ्छाफलप्रदम् ॥ ७॥
नमामितमहं नित्यं भुक्तिमुक्ति फलप्रदम् ।
अनन्त शीलशोभाढ्यं श्यामलं गरूडध्वजम् ॥ ८॥
नमामि तमहं भक्त्या सदानन्दैकरूपिणम् ।
मधुरं मधुरं नादं वंशीवादन कारकम् ।
कृपादृष्ट्या सुधावृष्ट्या पूरयन्तं नमाम्यहम् ॥ ९॥

इति श्री स्वामी उमेश्वरानन्दतीर्थविरचितं श्रीकृष्णस्तोत्रं सम्पूर्णम् ।

राधाप्रार्थनाचतुःश्लोकी



राधा कैंकर्यप्रार्थनाचतुःश्लोकी

कृपयति यदि राधा बाधिताशेषबाधा
किमपरमवशिष्टं पुष्टिमर्यादयोर्मे ।
यदि वदति च किञ्चित्स्मेरहासोदितश्री-
र्द्विजवरमणिपङ्क्त्या भुक्तिशुक्त्या तदा किम् ॥ १॥

श्यामसुन्दर शिखण्डशेखर
स्मेरहास्य मुरलीमनोहर ।
राधिकारसिक मां कृपानिधे
स्वप्रियाचरणकिङ्करं कुरुष्व ॥ २॥

प्राणनाथ वृषभानुनन्दिनी
श्रीमुखाब्जरसलोलषट्पद ।
राधिकापदतले कृतस्थिति-
स्त्वां भजामि रसिकेन्द्रशेखर ॥ ३॥

संविधाय दशने तृणं विभो
प्रार्थये व्रजमहेन्द्रनन्दन ।
अस्तु मोहन तवातिवल्लभा
जन्मजन्मनि मदीश्वरी प्रिया ॥ ४॥

इति श्रीविठ्ठलेश्वरविरचिता
राधाप्रार्थनाचतुःश्लोकी सम्पूर्णा ।

श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे सरस्वतीकृतम्

सरस्वत्युवाच ।

रासमण्डलमध्यस्थं रासोल्लाससमुत्सुकम् ।
रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ १॥
रासेश्वरं ऱासकरं वरं ऱासेश्वरीश्वरम् ।
ऱसाधिष्ठातृदेवं च वन्दे ऱासविनोदिनम् ॥ २॥
रासायासपरिश्रान्तं रासरासविहारिणम् ।
रासोत्सुकानां गोपीनां कान्तं शान्तं मनोहरम् ॥ ३॥
प्रणम्य च तमित्युक्त्वा प्रह्यष्टवदना सती ।
उवास सा सकामा च रत्नसिंहासने वरे ॥ ४॥
इति वाणीकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
बुद्धिमान्धनवान्सोऽपि विद्यावान्पुत्रवान्सदा ॥ ५॥
इति ब्रह्मावैवर्ते सरस्वतीकृतं श्रीकृष्णस्तोत्रम् ।

श्रीकृष्णस्य सप्तदशाक्षरो मन्त्रः

श्रीकृष्णमन्त्रकवचम्

श्रीगणेशाय नमः ।

महादेव उवाचः ।

ॐ श्रीं नमः श्रीकृष्णाय परिपूर्णतमाय च ।
मन्त्रेषु मन्त्रराजोऽयं महान् सप्तदशाक्षरः ॥ १॥
सिद्धोऽयं पञ्चलक्षेण जपेन मुनिपुङ्गव ।
तद्दशांशं च हवनं तद्दशांशाभिषेचनम् ॥ २॥
तर्पणं तद्दशांशं च तद्दशांशं च मार्जनम् ।
सुवर्णानां च शतकं पुरश्चरणदक्षिणा ॥ ३॥
मन्त्रसिद्धस्य पुंसश्च विश्वं करतलं मुने ।
शक्तः पातुं समुद्रांश्च विश्वं संहर्त्तुमीश्वरः ।
पाञ्चभौतिकदेहेन वैकुण्ठं गन्तुमीश्वरः ॥ ४॥
तस्य संस्पर्शमात्रेण पादपङ्कजरेणुना ।
पूतानि सर्वतीर्थानि सद्यः पूता वसुन्धरा ॥ ५॥
॥ श्रीकृष्णस्य सप्तदशाक्षरो मन्त्रः समाप्तम् ॥

श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे ब्रह्मकृतम्

ब्रह्मोवाच

कृष्णं वन्दे गुणातीतं गोविन्दमेकमक्षरम्
अव्यक्तमव्ययं व्यक्तं गोपवेषविधायिनम् ॥ १॥
किशोरवयसं शान्तं गोपीकान्तं मनोहरम् ।
नवीननीरदश्यामं कोटिकन्दर्पसुन्दरम् ॥ २॥
वृन्दावनवनाभ्यर्णे रासमण्डलसंस्थितम् ।
रासेश्वरं रासवासं रासोल्लाससमुत्सुकम् ॥ ३॥
इत्येवमुक्त्वा तं नत्वा रत्नसिंहासने वरे ।
नारायणेशौ संभाष्य स उवास तदाज्ञया ॥ ४॥
इति ब्रह्माकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
पापानि तस्य नश्यन्ति दुःस्वप्नः सुस्वप्नो भवेत् ॥ ५॥
भक्तिर्भवति गोविन्दे श्रीपुत्रपौत्रवर्धिनी ।
अकीर्तिः क्षयमाप्नोति सत्कीर्तिर्वर्धते चिरम् ॥ ६॥
इति ब्रह्मावैवर्ते ब्रह्माकृतं श्रीकृष्णस्तोत्रम् ।



राधोपनिषदोक्त
राधानामानि

राधा रासेश्वरी रम्या कृष्णमन्त्राधिदेवता ।
सर्वाद्या सर्ववन्द्या च वृन्दावनविहारिणी ॥
वृन्दाराध्या रमाशेषगोपीमण्डलपूजिता ।
सत्या सत्यपरा सत्यभामा श्रीकृष्णवल्लभा ॥
वृषभानुसुता गोपी मूलप्रकृतिरीश्वरी ।
गान्धर्वा राधिकाऽऽरम्या रुक्मिणी परमेश्वरी ॥
परात्परतरा पूर्णा पूर्णचन्द्रनिभानना ।
भुक्तिमुक्तिप्रदा नित्यं भवव्याधिविनाशिनी ॥

राधा ॥ १॥ रासेश्वरी ॥ २॥ रम्या ॥ ३॥ कृष्णमन्त्राधिदेवता ॥ ४॥
सर्वाद्या ॥ ५॥ सर्ववन्द्या ॥ ६॥ वृन्दावनविहारिणी ॥ ७॥ वृन्दाराध्या ॥ ८॥
रमा ॥ ९॥ अशेषगोपीमण्डलपूजिता ॥ १०॥ सत्या ॥ ११॥ सत्यपरा ॥ १२॥
सत्यभामा ॥ १३॥ श्रीकृष्णवल्लभा ॥ १४॥ वृषभानुसुता ॥ १५॥ गोपी ॥ १६॥
मूलप्रकृति ॥ १७॥ ईश्वरी ॥ १८॥ गान्धर्वा ॥ १९॥ राधिका ॥ २०॥
आरम्या ॥ २१॥ रुक्मिणी ॥ २२॥ परमेश्वरी ॥ २३॥ परात्परतरा ॥ २४॥
पूर्णा ॥ २५॥ पूर्णचन्द्रनिभानना ॥ २६॥ भुक्तिमुक्तिप्रदा ॥ २७॥ भवव्याधिविनाशिनी ॥ २८॥

श्रीदैन्याष्टकम्

हाहा श्रीवल्लभाधीश हाहा कृष्ण मुखाम्बुजः ।
हाहा वियोग भावाग्ने देहि मे निजदर्शनम् ॥ १॥
हाहा विशालनयन हाहा फुल्लतमानन ।
हाहा सुनासिकाशोभ देहि मे निजदर्शनम् ॥ २॥
हाहा लोकावृत मुख हाहामित सुधाधर ।
हाहातिरम्यचुबक देहि मे निजदर्शनम् ॥ ३॥
हाहा निजजनाधार हाहा दीनजाश्रय ।
हाहा दयार्द्रहृदय देहि मे निजदर्शनम् ॥ ४॥
हाहा स्वकीय सर्वस्व हाहाधन मनोधन ।
हाहाति मृदुल स्वान्त देहि मे निजदर्शनम् ॥ ५॥
हाहा कृतस्वकीयार्ते हाहा भावार्ति दायक ।
हाहा पुष्टि पथाचार्य देहि मे निजदर्शनम् ॥ ६॥
हाहा निजजनप्राण हाहा निजजनावृत ।
हाहा पुष्टि पथाचार्य देहि मे निजदर्शनम् ॥ ७॥
हाहा विजित कन्दर्प हाहा स्वानन्दतुन्दिल ।
हाहा हरिविहारात्मन् देहि मे निजदर्शनम् ॥ ८॥
इति श्रीहरिदासोदितं दैन्याष्टकं सम्पूर्णम् ।

कृष्णापञ्चगङ्गासङ्गमस्तोत्रम्

कृष्णाप्रवाहेऽत्र तु पञ्चगङ्गायुजिः
प्रतीताखिलपापभङ्गा ।
गङ्गार्कजायुत्यधिपुण्यदात्री
श्रेयोविधात्री सकलाघहन्त्री ॥ १॥

तीर्थं प्रयागेन समं मनोहरं क्षेत्रं
कुरुक्षेत्रसमं यतो वरम् ।
सद्यः कुरुक्षेत्रवराधिपुण्यदं
तं सङ्गमाख्यं प्रणमामि कामदम् ॥ २॥

उदुम्बरः कल्पतरुर्यत्रास्ते चामरेश्वरः ।
विश्वेश्वरसमो यत्र शक्तितीर्थं च यत्र हि ॥ ३॥

यत्र श्रीसद्गुरोर्वासः सर्वाभीष्टार्थपूरकः ।
सुतरां भ्राजतेऽनेन सङ्गमोऽस्मै नमो नमः ॥ ४॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं
कृष्णापञ्चगङ्गासङ्गमस्तोत्रं सम्पूर्णम् ।

श्रीकृष्णार्तिक्यम्

मुचुकुन्देन यवनमिव दह गुरुणा मोहं
स्पर्शमणिर्न सुवर्णं कुरुते किमु लोहं
पतितोऽजामिल इव गजपतिरिव विकलोऽहं
प्रभुरसि वेत्सि च दातुं वरसुखसन्दोहं
जय भगवन् चक्रगदाशङ्खाम्बुजपाणे
कुरु मयि दृष्टिं सकृपामसति(१) यथा बाणे । ध्रुव० ॥ १ ॥

अघमिव मामपि दुरितात्कुरुषे यदि मुक्तं
भवतो (२)नवतोयदमदहरकान्ते युक्तं
पालय न मे प्रणश्यति भक्त इति यदुक्तं
स्मर तस्कलुषनगभिदुर विदुरगृहे भुक्तम् । जय भगवन् ॥ २ ॥

मायामूढेऽत्र जने दृष्ट्वालं दोषं
मातुर्न मनस्तोके दृष्टं कृतरोषं
ब्रह्मण्योऽसि विधेहि त्वं ब्राह्मणपोषं
वितर मयूरे भक्ते करुणाघन तोषम् । जय भगवन् ॥ ३ ॥

इति श्रीरामनन्दनमयूरेश्वरकृतं श्रीकृष्णार्तिक्यं सम्पूर्णम् ।

१। दुर्जने राक्षसे इत्यर्थः ।

२। नवस्य तोयदस्य मदं हरतीति तादृशी कान्तिर्यस्य तत्सम्बुद्धौ ।



श्रीस्वामिनीप्रार्थनाषट्पदी

श्रीराधे! प्रियतमदृक्सङ्गमसञ्जातहासदृक्सलिलैः ।
भवदीयैः स्नानं मे भूयात् सततं न पाथोभिः ॥ १॥
भूयान् मेऽभ्यवहारस्तावकताम्बूलचर्वितेनैव ।
पानं करुणाकूतस्मितावलोकामृतेनैव ॥ २॥
त्रिषवणमिह भवदङ्घ्रिप्रणतिः सन्ध्या प्रकृष्टदैन्येन ।
जापस्तु तापक्लेशैर्विगाढभावेन कीर्तनं नाम्नाम् ॥ ३॥
अस्तङ्गच्छत्सूर्याशुशुक्षणौ दिवसदुःखहोमोऽस्तु ।
त्वत्पृष्टप्रियवार्ताकथनं मे ब्रह्मयज्ञोऽस्तु ॥ ४॥
भवतीनां प्रियसङ्गम-सञ्जात-मनोमहोत्सवेक्षणतः ।
तर्पणमिह सर्वेन्द्रियतृप्तिर्भवताद्मनोरथाप्त्या मे ॥ ५॥
इत्थं जीवनमस्तु क्षणमपि भवदङ्घ्रिविप्रयोगे तु ।
मरणं भवतादेवम्भावे शरणं त्वमेव भव ॥ ६॥

इति श्रीमद्विट्ठलेश्वरविरचिता श्रीस्वामिनीप्रार्थनाषट्पदी समाप्ता ।

आनन्दचन्द्रिकास्तोत्रम्

श्रीश्रीराधाकृष्णाभ्यां नमः ।

ध्यानम् ।

अङ्गश्याममलिमच्छटाभिरभितो मन्दीकृतेन्दीवरं
जाड्यं जागुडरोचिषां विदधतं पट्टाम्बरस्य श्रिया ।
वृन्दारण्यविलासिनं हृदि लसद्दामाभिरामोदरं
राधास्कन्धनिवेशितोज्ज्वलभुजं ध्यायेम दामोदरम् ॥

अथ श्रीराधिकाया आनन्दचन्द्रिकास्तोत्रं

श्रीराधिकायै नमः ।

राधादामोदरप्रेष्ठा राधिका वार्षभानवी ।
समस्तवल्लवीवृन्दधम्मिल्लोत्तंसमल्लिका ॥ १॥
कृष्णप्रियावलीमुख्या गान्धर्वा ललितासखी ।
विशाखासख्यसुखिनी हरिहृद्भृङ्गमञ्जरी ॥ २॥
इमां वृन्दावनेश्वर्या दशनाममनोरमाम् ।
आनन्दचन्द्रिकां नाम यो रहस्यां स्तुतिं पठेत् ॥ ३॥
स क्लेशरहितो भूत्वा भूरिसौभाग्यभूषितः ।
त्वरितं करुणापात्रं राधामाधवयोर्भवेत् ॥ ४॥

इति श्रीरूपगोस्वामिविरचितस्तवमालायां आनन्दचन्द्रिकास्तोत्रं समाप्तम् ।

श्रीकृष्णलीलास्तुतिः

निगमतरोः प्रतिशाखं मृगितं च मया परं ब्रह्म ।
मिलितमिदानीमङ्के गोकुलपङ्केरुहाक्षीणाम् ॥ १॥
तप्तं तपोभिरन्यैः फलितं च तद्गोपबालानाम् ।
आसां यत्कुचकुम्भे नीलनिचोलायते परम्ब्रह्म ॥ २॥
श्रुतिमपरे स्मृतिमपरे भारतमन्ये भजन्तु भवभीताः ।
अहमपि नन्दं वन्दे यस्यालिन्दे परम्ब्रह्म ॥ ३॥
किं कथयामः कस्मै कस्य मनः प्रत्ययमाधत्ते ।
रमयति गोपवधूटीकुञ्जकुटीरे परम्ब्रह्म ॥ ४॥
नीतन्नीतं नवनवनीतं केन च पीतं पयः क्व मे मुरली ।
इति समुदीर्य लुठन्तं भूमौ बालं
नमामि गोपालं सम्पूर्णम् । ५॥
पश्यत बलमबलानामनाविले हृद्बिले बबन्धुर्याः ।
तनुदृष्टिपातरश्म्याऽऽकृष्टममूर्तं परम्ब्रह्म ॥ ६॥
एतत्त्वामहमर्थयामि सततं रे चित्त चिन्तातुर
मा चिन्तां कुरु चञ्चलेषु विषयेष्वागारदारादिषु ।
गायन्तं यमुनातटद्रुमतले नीलाम्बुदश्यामलं
गोपालं वनमालिनं कमलिनं नन्दात्मजं चिन्तय ॥ ७॥
ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियं
ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते ।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं
कालिन्दीपुलिनेषु तत्किमपि यन्नीलं तमो धावति ॥ ८॥
इति श्रीकृष्णलीलास्तुतिः समाप्ता ।

आनन्दस्तोत्रम्

श्रीकृष्णः परमानन्दो गोविन्दो नन्दनन्दनः ।
तमालश्यामलरुचिः शिखण्डकृतशेखरः ॥ १॥
पीतकौशेयवसनो मधुरस्मितशोभितः ।
कन्दर्पकोटिलावण्यो वृन्दारण्यमहोत्सवः ॥ २॥
वैजयन्तीस्फुरद्वक्षाः कक्षात्तलगुडोत्तमः ।
कुञ्जापितरतिर्गुञ्जापुञ्जमञ्जुलकण्ठकः ॥ ३॥
कर्णिकाराढ्यकर्णश्रीधृतिस्वर्णाभवर्णकः ।
मुरलीवादनपटुर्वल्लवीकुलवल्लभः ॥ ४॥
गान्धर्वाप्तिमहापर्वा राधाराधनपेशलः ।
इति श्रीकृष्णचन्द्रस्य नाम विंशतिसंज्ञितम् ॥ ५॥
आनन्दाख्यं महास्तोत्रं यः पठेच्छृणुयाच्च यः ।
स परं सौख्यमासाद्य कृष्णप्रेमसमन्वितः ॥ ६॥
सर्वलोकप्रियो भूत्वा सद्गुणावलिभूषितः ।
व्रजराजकुमारस्य सन्निकर्षमवाप्नुयात् ॥ ७॥

इति श्रीरूपगोस्वामिविरचितस्तवमालायां श्रीमहानन्दाख्यस्तोत्रं समाप्तम् ।



नामयुगाष्टकम्

अथ श्रीराधामाधवयोर्नामयुगलाष्टकम् ।

श्रीश्रीराधाकृष्णाभ्यां नमः ।

राधामाधवयोरेतद्
वक्ष्ये नामयुगाष्ट्कम् ।
राधादामोदरौ पूर्वं
राधिकामाधवौ ततः ॥ १॥

वृषभानुकुमारी च तथा गोपेन्द्रनन्दनः ।
गोविन्दस्य प्रियसखी
गान्धर्वाबान्धवस्तथा ॥ २॥

निकुञ्जनागरौ गोष्ठकिशोरजनशेखरौ ।
वृन्दावनाधिपौ
कृष्णवल्लभाराधिकाप्रियौ ॥ ३॥

इति श्रीरूपगोस्वामिविरचितस्तवमालायां
श्रीराधामाधवयोर्नामयुगाष्टकं

सम्पूर्णम् ।